प्रवेश सं० ७६८५

विषय: धर्मशास्त्रम्

क्रम सं०

नाम सर्वेश्वरकारिका

12027

ग्रन्थकार सर्वेश्वरः

पत्र सं० २-१८

श्लोक सं०

अक्षर सं० (पंक्तौ) २४

पंक्ति सं० (पृष्ठे) ७.

आकार: ८.७" x ४.५"

लिपि: दे. ना.

आधार: का.

वि० विवरण अपू०

जि १४३४.

पी० एस० यू० पी०—७७ एस० सी० ई०—१६५१—५०,०००

Indira Gandhi National Centre for the Arts

दि· १४३४

नत्वास्फुरंकारिकांसंध्योपक्रमकारिणीं द्विजवरः सर्वेश्वरोना
मतः॥औदीच्यस्त्कसमुद्भवोभृगुकुलेलीलाधरस्यात्मजोदेवेरुद्र
विधौपतुर्विरचितांकुर्वेगुरूक्त्याशिवां॥१॥अथनित्यकर्मविधा
नं॥प्रातरुत्थायकर्त्तव्यंयद्द्विजेन दिनेदिने॥तदहंसंप्रवक्ष्यामि
द्विजानामुपकारिकां॥उदयास्तमयंवायावद्द्विजःसत्कर्मकृद्भवेत्
॥नित्यनैमित्तिकैर्युक्तःकाम्यैश्चान्यैरगर्हितः॥२॥आत्मनोनसहा
यार्थेपितामाताचतिष्ठति॥नपुत्रदारानज्ञातिर्द्धर्मस्तिष्ठतिकेवलं

प्र. सं. ७६८८

Indira Gandhi National
Centre for the Arts

॥२॥ ॥३॥ तस्माद्धर्मसहायार्थं नित्यं संचिनुसाधनैः॥ धर्मेणैवसहायेनतम
स्तरतिदुस्तरं॥४॥ उत्थायोत्थायबोद्धव्यंकिमद्यसुकृतंकृतं॥ दत्तंवा
दापितंवापिवाक्यसत्यंचाभिभाषितं॥५॥ समुद्रमेखलेनेतिपृथि
व्याःस्तुतिमाचरेत्॥ ॐसमुद्रमेखलेदेवीपर्वतस्तनमंडले॥ विष्णु
पत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे॥६॥ वेदमंत्रेषुसर्वेषुॐकारःप्र
थमःस्मृतः॥ ॐ॥ ॥ब्राह्मणःश्रुतिसंपन्नःस्वधर्मनिरतःसदा॥
सवैदिकंजपेन्मंत्रंलौकिकंनकदाचन॥७॥ स्मृत्यंतरे॥ यद्यपिस्या
त्स्वयंब्रह्मात्रैलोक्याकर्षणक्षमः॥ तथापिलौकिकाचारोमनसापिन ॥२॥

लंघयेत्॥८॥ हस्तौपादौचप्रक्षाल्यद्विजःपद्मासनःस्थितः॥ तत
आचमनंकुर्यात्प्राणायाममतःपरं॥९॥ अथात्मचिन्तनंकृत्वाप्रज
पांतदनुस्मरेत्॥ अथात्मचिंतनं॥ उपपापेषुसर्वेषुपातकेषुमह
त्स्वपि॥ अवाप्यरजनीयामंब्रह्मध्यानंसमाचरेत्॥१॥ ऊरुस्थोत्ता
नचरणःसव्येन्यस्तोत्तरंकरं॥ उत्तानंकिंचिदुत्तानमवष्टभ्यमुखं
दा॥२॥ निमिलिताक्षःसत्वस्थोदंतैर्दंतान्नसंस्पृशेत्॥ तालुस्था
चलजिह्वश्चसंवृतास्यःसुनिश्चलः॥३॥ सन्निरुद्धेंद्रियग्रामोना
तिनिम्नस्थितासनः॥ द्विगुणंत्रिगुणंवापिप्राणायाममुपक्रमेत्॥४॥

Indira Gandhi National Centre for the Arts

॥३॥ तैलाग्निवर्त्तिसंयोगादधस्मंज्योतिरुत्तमं॥तदंशंपीकसंरूपंस्मरेत्पा
र्थमनन्यभाक॥५॥ततोध्येय.स्थितोयोसौहृदयेदीपवत्प्रभुः॥धा
रयेत्तत्रचात्मानंधारणांधारयेद्बुधः॥६॥अथात्मानंधारयेत्॥तत्र
सधूमप्राणायामेनध्यायेत्॥सधूमःश्वाससंयुक्तोविधूमःश्वास
वर्जितः॥सगर्भोजपसंयुक्तोह्यगर्भोध्यानमात्रकः॥७॥वर्णत्र
यात्मकाह्येतेरेचपूरककुंभकाः॥सएवप्रणवःप्रोक्तःप्राणायामश्चत
न्मयः॥८॥इडयावायुमारोप्यपूरयित्वोदरस्थितं॥शनैःषोडशमात्रा
निरकारंतत्रसंस्मरेत्॥९॥ध्यात्वाहृदिवसधस्माग्निंमानसैःप्रजये ॥३॥

बुधः॥अथसर्वदेवताध्यानप्रकारः॥आधारादिसहस्रारपर्यंतंत
त्रकारिका॥आधारेलिंगनाभौप्रकटितहृदयेतालुमूलेललाटे
पत्रेषोडशारेद्विदशदशदलेद्वदशार्द्धेचतुष्के॥वासांतेबालमध्ये
डफकठसहितेकाठदेशेस्वराणांहक्षंतत्वार्थयुक्तंसकलदलयुतं
वर्णरूपंनमामि॥तत्रव्याख्यानं॥शुद्धमुद्राधारमंडपेचतुर्दलप
द्मसंस्थितायांश्रीगणेशस्यहेमवर्णःषट्शतअजपामंत्रस्यऐंबी
जंइच्छाशक्तिःईश्वरऋषिःवंशंषंसंइतिमातृकासहितेअवगंधा
क्षतपुष्पधूपदीपनैवेद्यफलतांबूलैर्मानसपूजा॥श्रीगणेशाय

Indira Gandhi National
Centre for the Arts

॥४॥ नमः।षट्शतंअजपामंत्रंसमर्प्पयामि॥क्षमामुद्रास्वाधिष्ठानमंडपे
षट्दलपद्मसंस्थितायांश्रीब्रह्मादेवतासावित्रीशक्तिःरक्तवर्णःष
ट्सहस्रअजपामंत्रस्यक्लींबीजंक्रियाशक्तिःइंद्रऋषिःबंभंमंयंरंलं
इतिमातृकासहितेअत्रगंधेत्यादिश्रीब्रह्मणेनमःषट्सहस्रंअजपा
गायत्रीमंत्रंसमर्पयामि॥विततमुद्राअनाहतमंडपेदशदलपद्मस्थि
तायांश्रीविष्णुर्देवताश्रीशक्तिःकृष्णवर्णःषट्सहस्रअजपागाय
त्रीमंत्रस्यक्लींबीजंयंशक्तिःइंद्रऋषिःडंढंणंतंथंदंधंनंपंफंइतिमा
तृकासहितेत्र॥श्रीविष्णवेनमः॥षट्सहस्रंअजपागायत्रीमंत्रंस० ॥४॥

विस्तृतमुद्राडंभनाभौमणिपूरमंडपेद्वादशपद्मस्थितायांश्रीरुद्रोदे
वतागौरीशक्तिःश्वेतवर्णःषट्सहस्रअजपामंत्रस्यऐंबीजंइच्छाश
क्तिःईश्वरऋषिःकंखंगंघंङंचंछंजंझंञंटंठंइतिमातृकासहितेत्र॰
रुद्रायनमःषटसहस्रंअ॰यामि॥लिंगमुद्रास्वरेकंठेविशुद्धमंडपेषो
डशदलपद्मस्थितायांश्रीजीवात्मनेअव्यक्तशक्तिःस्फटिकंवर्णःएक
सहस्रअजपागायत्रीमंत्रस्यहंबीजंस्वरात्मिकाशक्तिःअग्निऋषिः
अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः इतिमातृकासहितेऽत्र॰श्री
जीवात्मनेनमः॥एकसहस्रंअजपामंत्रंसमर्प्पयामि॥मोक्षमुद्रा

Indira Gandhi National
Centre for the Arts

॥५॥ भ्रूमध्यसंडपेद्विदलपद्मस्थितायांश्रीपरमात्मनेनमः॥मायाशक्तिःआको
शवानुज्योतिर्वर्णः एकसहस्रअजपामंत्रस्यगंक्लींबीजंस्वरात्मिकाश॥
क्तिःईश्वरऋषिःहक्षंइतिमातृकासहितेऽत्र श्रीपरमात्मनेनमः॥एकस
हस्रंमि॥प्रकाशमुद्राशिरःस्थानेसहस्रदलपद्मास्थितायांश्रीगुरुवेन
मः प्रकाशशक्तिःस्फटिकवर्णःपेकसहस्रअजपागायत्रीमंत्रस्यपरमा
त्माबीजंश्रीशक्तिःपरंब्रह्मऋषिःॐमितिपरब्रह्मरूपिणेऽत्रगंधादत
पुष्पधूप श्रीगुरुवेनमः॥एकसहस्रअजपागायत्रीमंत्रंसमर्पयामि॥
अथन्यासः॥हंसोज्ञानात्मनेअंगुष्ठाभ्यांनमः॥सहंसःसूर्यात्मनेतर्जनी ॥५॥

भ्यांनमः॥हंसःसोमात्मनेमध्यमाभ्यांनमः॥हंसोनिरंजनात्मनेअनामि
काभ्यांनमः॥हंसोनिराभासात्मनेकनिष्ठिकाभ्यांनमः॥हंसःअचलस्सू
क्ष्मप्रचोदयात्॥करतलकरपृष्ठाभ्यांनमः॥एवंहृदयादीन्यासः॥ॐभूर्
भुवःस्वःइतिदिग्बंधः॥ ॥अथध्यानं॥ ॥अरुणकमलकांतिंपद्म
संस्थांचगौरीहरनियमितविचित्रांपद्मसंन्यस्तपादां॥भजतिलभेति भव
चेष्टंप्राप्यतेपांशुकणंशिवदशनस्तुपुण्यंचाद्यस्तयंप्रभातं॥शौचप
पर्यंतं॥श्वासोच्छ्वासरूपेणएकेनाधिकविंशति॥सहस्रषट्शतंअ
जपामंत्रंसमर्पयामि॥हंसोगणेशोविधिरेवहंसोहंसोहरिर्हंसपरश्च

Indira Gandhi National
Centre for the Arts

॥६॥ रान्नुः॥ हंसोहंजीवोपरमात्मा हंसोहंसोहमात्मागुरुदेवहंसः॥गमागमस्थं
गमनादिरूपंचिदंनिरुक्तेतिनिशांतकारं॥आराधयामिमनसानिगमा
त्मानन्तंमायापुरीहृदयपंकजसंन्निविष्टं॥श्रद्धानदीविमलचित्तजला
भिषेकंनित्यंसमाधिकुसुमैर्नपुनर्भवाय॥अजपानामगायत्रीयोगिनां
सिद्धिदायिनी॥अस्याःसंकल्पमात्रेणसर्वपापैःप्रमुच्यते॥अनयासदृशं
पुण्यमनयासदृशोजपः॥अनयसदृशीविद्यानभूतानभविष्यति॥अ
जपांपठतेनित्यंपुनर्जन्मनिविद्यते॥ ॥अथजपः॥ ॥सोहमितिमंत्रस्य
आत्माऋषिःपरमात्मादेवताजीवेश्वरयोरेकत्वसिद्ध्यर्थेसोहमितिमं ॥६॥

त्रजपेविनियोगः॥सोहंहंसःहंसःसोहं॥हकारःशिवरूपेणसकारःश
क्तिरुच्यते॥सोहंहंसोऽष्टधामूर्तिर्वैजीवोजपतिसर्वदा॥१॥षट्शतंचग
णेशायषट्सहस्रंपितामहः॥षट्सहस्रंगदापाणिःषट्सहस्रंत्रि
लोचनः॥२॥आत्माचैकसहस्रंवैसहस्रंपरमात्मने॥सहस्रंगुरवेचै
वजपसंख्यांनिवेदयेत्॥३॥षट्शतानिदिवारात्रौसहस्राण्येकविं
शतिः॥हंसोहंसमिमंमंत्रंजीवोजपतिसर्वदा॥४॥अथोत्तरध्यानं॥
स्थितिःसेवागतिर्यात्रामतिश्चिंतास्तुतिर्वचः॥अहंसर्वात्मकोविष्णोस्म
तिःसर्वत्वदर्चनं॥५॥गुरुब्रह्मादिभिर्मंत्रैर्गुरुवंदनमाचरेत्॥गुरुब्र

Indira Gandhi National Centre for the Arts

॥७॥ ब्रह्मागुरुर्विष्णुर्गुरुर्देवो महेश्वरः॥गुरुरेव परब्रह्म तस्मै श्रीगुरवे न
मः॥७॥पुण्यश्लोकादिकान्स्मृत्वा प्रातरन्यादिकास्तथा॥पुण्य
श्लोको नलोराजा पुण्यश्लोको युधिष्ठिरः॥पुण्यश्लोकश्च वैदेही पु
ण्यश्लोको जनार्दनः॥८॥ब्रह्मरन्ध्रादिमारभ्य नोदे हंतारश्च यः प
न्या३ ठेत्॥इत्युषःकाले आत्मचिंतनं समाप्तं॥अथ प्रातर्विधिः॥आचा
॥हीनं न पुनंति वेदा यद्यप्यधीताः सह षड्भिरंगैः॥छंदांस्येनं मृत्यु
काले त्यजंति नीडं शकुंताऽइव जातपक्षाः॥१॥ब्राह्मे मुहूर्ते चोत्था
यतत्सर्वं सम्यगाचरेत्॥ब्राह्मो मुहूर्तः पंचमयामार्द्धः वेदतत्त्वार्थो ॥७॥

ब्रह्म॥पंचपंच उषःकालः षट्पंचस्यारुणोदयः॥अष्टपंच भवेत्प्रातः
शेषः सूर्योदयः स्मृतः॥२॥ततः प्रातः समुत्थाय कुर्याद्विण्मूत्रमेव
च॥नैर्ऋत्यामिषुविक्षेपः मतात्याभ्यधिकं भुवि॥३॥कृत्वा यज्ञोपवी
तं तु पृष्ठतः कंठलंबितं॥विण्मूत्रं तु गृही कुर्यात्कर्णस्थं प्रथमाश्रमी॥
॥४॥दूरादुच्छिष्टविण्मूत्रपादांभांसि समुत्सृजेत्॥श्रुतिस्मृत्युदितं स
म्यङ्नित्यमाचारमाचरेत्॥इति याज्ञवल्क्यवचनात्॥निवीतं तु मनु
ष्याणां प्राचीनावीतं पितॄणामुपवीतं देवतानां॥इति तैत्तिरीयाम्
त्रे तु दक्षिणकर्णे पुरीषे दक्षवामयोः॥गच्छंतु मंत्रमुच्चार्य मृतोद्वासने

Indira Gandhi National
Centre for the Arts

२ ननदीतीरमासाद्यनभस्मास्थिनगोमये॥१०॥शौचेयत्नःसदाकार्यःशौचमूलोद्विजःस्मृतः २

कारिका ॥८॥ हेतवे॥५॥गंधर्वऋषयोदेवाःपिशाचाःप्रेतगुह्यकाः॥मलमूत्रंत्यजि
ष्यामित्वरयात्रमिदेवता॥६॥अंतर्द्धायतृणैर्भूमिंशिरःप्रावृत्यवास
सा॥त्रितालंतत्रदत्वातुमलमूत्रंत्यजेद्बुधः॥७॥वाचंनियम्ययत्नेन
ष्ठीवनश्वासवर्जितः॥कुशाःकाशाःशरादूर्वावर्जयेद्यत्नतःसुधीः
॥८॥स्थानानिफालकृष्टानिवर्जयेद्यत्नतोऽन्यधीः॥नफालकृष्टेन
हारितसूणे जलेचितायांनचपर्वते॥नजीर्णदेवायतनेनवल्मीकेनशाड्वले॥९॥
६ नसत्वेषुनगर्तेषुनगच्छन्नपथिस्थितः॥शौचाचारविहीनस्यसम
स्तानिष्फलाःक्रियाः॥११॥अंतर्जलाद्देवगृहाद्वल्मीकान्मूषकोत्क ॥८॥

रात्॥कृताशौचावसिष्टाचनग्राह्याःसप्तमृत्तिकाः॥१२॥त्रिपर्वपूरणा
यावामृत्तिकाक्षप्रमाणका॥आर्द्रामलकमात्रावामूत्रशौचेचमृत्ति
का॥१३॥मूत्रात्तुद्विगुणंशुक्रेमैथुनेत्रिगुणंस्मृतं॥उच्चारेमैथुनेवा
पिप्रस्रावेदंतधावने॥१४॥स्नानेभोजनकालेचषट्सुमौनंसमाच
रेत्॥संध्ययोरुभयोर्जाप्येभोजनेदंतधावने॥पितृकार्येचदैवेचत
थामूत्रपुरीषयोः॥१५॥गुरूणांसन्निधौदानेयोगेचैवविशेषतः॥
एषुमौनंसमातिष्ठेत्स्वर्गमाप्नोतिमानवः॥१६॥स्नास्यतोवरुणःश्रा
तिंजुह्वतोऽग्निःश्रियंहरेत्॥भुंजतोमृत्युरायुष्यतस्मान्मौनंत्रि

Indira Gandhi National
Centre for the Arts

कारीका
॥९॥ सुस्मृतं॥१७॥द्विजोमूत्रंपुरीषंचदिवाकुर्यादुदङ्मुखः॥दक्षिणाभि
मुखोरात्रौसंध्ययोश्चतथादिवा॥१८॥छायायामंधकारेवारात्रा
वहनिवाद्विजः॥यथासुखंमुखःकुर्यात्प्राणबाधाभयेषुच॥१९॥
अवकृष्यचविण्मूत्रंकाष्ठलोष्ठतृणादिना॥उदस्तवासाउत्तिष्ठेद्दृ
ढंविधृतमेहनः॥२०॥वाय्वग्निविप्रमादित्यमपःपश्यंस्तथैवगाः॥
कदाचिन्नैवकुर्वीतविण्मूत्रस्यविसर्जनं॥२१॥एकालिंगेतिविध
नाशौचंकुर्याद्दत्तंद्वितः॥एकालिंगेगुदेतिस्रउभयोर्मृद्द्वयंस्मृतं॥
॥२२॥मूत्रशौचंसमाख्यातंशुक्रेचद्विगुणंस्मृतं॥पंचापानेदशैकस्मि ॥९॥

न्॥उभयोःसप्तमृत्तिकाः॥२३॥वामपादंपुरस्कृत्यपश्चाद्दक्षिणमे
वच॥प्रत्येकंचचतुर्वारंमृत्तिकांपालयेत्सुधीः॥२४॥एवंशौचंगृह
स्थानांद्विगुणंब्रह्मचारिणां॥त्रिगुणंचवनस्थानांयतीनांचचतुर्गुणं
॥२५॥मूत्रोत्सर्गेपुरीषेचभोजनेचैवरेतसि॥चतुरष्टद्विषड्द्व्यष्टगं
डूषैःशुद्ध्यतिक्रमात्॥२६॥तत्राचमनंप्रोक्तंप्राणायाममतःपरं
॥शातातपः॥अपांनोच्छिष्टदोषोस्तिमधुनोनचसर्पिषः॥नफला
नांनबालानानाकराणांनयोषितां॥२७॥आपत्कालेषुविप्रस्यशौ
चाचारंनचिंतयेत्॥स्ववंशामुद्धरेत्यस्यैत्स्वस्थोधर्मंसमाचरेत्॥२८॥ श्रा.

Indira Gandhi National
Centre for the Arts

कारिका ॥१०॥

शास्त्राचम्यशुचित्वंतुनप्रत्यक्षादिसाधनं॥शास्त्रतःकृतशौचानाम
शंकानैवविद्यते॥२०॥इतिशौचविधिः॥ ॥अथाचमनविधिः॥
तत्रयाज्ञवल्क्यः॥अंतर्जानुशुचौदेशेउपविष्टउदङ्मुखः॥प्राग्वा
ब्राह्मणतीर्थेनद्विजोनित्यमुपस्पृशेत्॥१॥कनिष्ठादेशिन्यंगुष्ठमू
लान्यग्रंकरस्यच॥प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥२॥
हृत्कंठतालुगाभिस्तुयथासंख्यंद्विजातयः॥शुध्येरन्स्त्रीचशूद्रश्च
सकृत्स्पृष्टाभिरंततः॥३॥अशब्दाभिरनुष्णाभिस्त्यक्ताभिःफेनबुद्बु
दैः॥आपङ्कतानांशुद्धिःस्यादुक्तेनस्तनपायिनां॥४॥संध्यार्थेभोजन ॥१०॥

र्थेवापित्र्यर्थेवातथैवच॥शूद्राहृतेननाचामेज्जपादिहवनेषुच॥५॥भार
द्वाजः॥संहताङ्गुलिनातोयंपाणिनादक्षिणेनच॥मुक्तांगुष्ठकनिष्ठाभ्यां
द्विजआचमनंचरेत्॥६॥कृत्वालंपादशौचंविमलमथजलंत्रिःपिबेद्विः
प्रमृज्याद्देशिन्यंगुष्ठयुग्मंसजलमभिमृशन्नासिकारंध्रयुग्मं॥अंगु
ष्ठानामिभ्यांनयनयुगयुतंकर्णमूलंकनिष्ठांगुष्ठेनाभिप्रदेशेहृदयम
थतलेनाङ्गुलीभिःशिरांसौ॥७॥अनेनैवविधानेनआचांतःशुचितां
मियात्॥उदकेचोदकस्थस्तुस्थलस्थस्तुस्थलेशुचिः॥पादौस्थाप्योभ
यत्रैवआद्रवासाभवेद्यदि॥८॥इतिशुद्धाचमनविधिः॥शिरःप्रावृत्य

Indira Gandhi National Centre for the Arts

कारिका ॥१२॥

कांवामुक्तकचत्रिखोपिवा॥अकृत्वापादयोःशौचमाचांतोप्यशुचिर्भवे
त्॥ए॥अथाचमननिमित्तानि॥मनुः॥सुप्त्वाक्षुत्वाचभुक्त्वाचनिष्ठीव्यो
क्त्वानृतंवचः॥पीत्वापोध्येष्यमाणश्चआचमेत्प्रयतोपिसः॥न॥१॥अ
न्यान्यपिस्मृतितोज्ञेयानि॥ ॥अथद्विराचमनविधिः॥तत्रयाज्ञवल्क्य
॥स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्योपसर्पणे॥आचांतःपुनराचामेद्वा
सोविपरिधायच॥१॥अथाचमनानुकल्पः॥तत्रमार्कंडेयपुराणे॥कु
र्यादाचमनंस्पर्शंगोपृष्ठस्यार्कदर्शनं॥कुर्वीतालंभनंवापिदक्षिण ॥१२॥
श्रवणस्यच॥अग्निरापश्चवेदाश्चसोमःसूर्योनिलस्तथा॥सर्वएवहि

विप्रस्यकर्णेतिष्ठंतिदक्षिणे॥२॥यथाविभवतोह्येतत्पूर्वाभावेततःपरं
॥नविद्यमानेपूर्वस्मिनुत्तरप्राप्तिरिष्यते॥३॥शातातपः॥वातकर्मणि
निष्ठीव्यदंतोच्छिष्टेतथानृते॥क्षुतेपतितसंभाषेदक्षिणंश्रवणंस्पृशे
त्॥४॥इतिश्रोत्राचमनं॥अथाचमनापवादः॥तत्रशातातपः॥दंतल
ग्नेफलेमूलेभक्ष्येस्नेहेतथैवच॥तांबूलेचेक्षुदंडेचनिच्छिष्टोभवति ख५
द्विजः॥फलेकटुतिक्तकषायेजातीफलादौसमाचारादित्याहुः॥भक्ष्ये
कटुकषाये॥सोपानत्कस्तसोष्णीषीपर्यंकासनयानगः॥दुर्देशेप्र
पदेश्चैवनाचामन्शुद्धिमाप्नुयात्॥१॥रथगोनरयानस्थोहस्त्यश्वस्थः

Indira Gandhi National
Centre for the Arts

कारिका ।।१२।।

रोहकस्तथा।।आचांतःकर्मशुद्धिःस्यात्तांबूलौषधिजग्धिकृत्।।अधोवा
युसमुत्सर्गेआक्रोशेक्रोधसंभवे।।मार्जारमूषकस्पर्शेआचांतस्तुशुचि
र्भवेत्।।४।।शाट्यायनः।।स्नानमाचमनंहोमंभोजनंदेवतार्चनं।।प्रौढ
पादोनकुर्वीतस्वाध्यायंपितृतर्पणं।।५।।आसनारूढपादस्तुजान्वोर्वा
जंघयोस्तथा।।कृतावसक्थिकोयस्तुप्रौढपादःसउच्यते।।६।।स्मा
र्त्ताचमनकंशुद्धंपौराणंवैदिकंतथा।।तांत्रिकंश्रौतमित्याहुःषड्विधं
स्मृतिनोदितं।।७।।विण्मूत्रादिकेशुद्ध्याचमनंपरिकीर्तितं।।स्मार्त्तंपौ
राणिकंकर्मआचांतेविधिपूर्वकं।।८।।वैदिकंश्रौतमित्यादिब्रह्मय ।।१२।।

इठ स्मृति ।।७

ज्ञातिपूर्वकं।।अस्त्रविद्यादिकंकर्मतांत्रिकेविधिरुच्यते।।९।।इत्या
चमनविधिः।। ।।अथदंतधावनविधिः।। ।।तत्रदक्षः।।मुखेपर्युषि
तेनित्यंभवत्यप्रयतोनरः।।तदार्द्रकाष्ठंशुष्कंवाभक्षयेद्दंतधाव
नं।।१।।करणकक्षीरवृक्षोत्थंद्वादशाङ्गुलंमव्रणं।।कनिष्ठिकायवस्थू
लंपर्वार्धकृतकूर्चकं।।स्मृत्यंतरं।।२।।जंबूदुंबरचूताम्रकदंबोलो
ध्रचंपकौ।।बदराद्रुमाश्चैवप्रोक्तावैदंतधावने।।३।।सौभाग्यंवाक्सं
ति दर्पेलक्ष्मीस्तेजोविवर्द्धनं।।क्रमाद्व्रतत्वेस्फलंप्रोक्तंतद्द्रुमेदंतधावने।।

Indira Gandhi National
Centre for the Arts

कारिका ॥१३॥

॥४॥ दशाङ्गुलंतुविप्राणांक्षत्रियाणांनवाङ्गुलं। अष्टांगुलंतुवैश्यानां
शूद्राणांसप्तसंमितं॥५॥ चतुरंगुलमानंतुनारीणांनात्रसंशयः॥५॥ वि
ष्णुः॥ सूक्ष्मंतुहीनदंतस्य समदंतस्यमध्यमं॥ स्थूलंविषमदंतस्यत्रि
विधंदंतधावनं॥६॥ अग्रंग्रंथिंसत्वचंस्तक्ष्णंकीटाग्निभिरदूषितं॥ प्रा
ङ्मुखस्तूपविष्टश्चभक्षयेद्वाग्यतोनरः॥७॥ गर्गः॥ प्राङ्मुखस्तुधृतिंसौ
ख्यंचारोग्यमेवच। दक्षिणेनतथाकष्टंपश्चिमेनपराजयः॥८॥
उत्तरेणगवांनाशःस्त्रीणांपरिजनस्यच। अन्नाद्यायव्यूहध्वंसो
मोराजायमागमत्॥ समेमुखेप्रमार्क्ष्यतेयशसाचभगेच॥१०॥आ ॥१३॥

युर्बलंयशोवर्चःप्रजाःपशुवसूनिच। ब्रह्मप्रज्ञांचमेधांचत्वंनोधे
हिवनस्पते॥११॥ इतिधावनमंत्रौ॥ विष्णुः॥ प्रक्ष्याल्यतच्चशुचौदेशे
दंतधावनमुत्सृजेत्॥ पतितेऽभिमुखेसम्यग्भोज्यंप्राप्नोत्यभिप्सितं॥
॥१२॥ अभावेदंतकाष्ठस्यनिषिद्धदिवसेषुच। अपांद्वादशगंडूषैर्विद
ध्याद्दंतधावनं॥१३॥ उदितेतुसहस्रांशौभक्षयेद्दंतधावनं। सवितान्नधि
तस्तेनस्वकुलंतेनघातितं॥१४॥ चतुर्दश्यष्टमीदर्शपूर्णिमासंक्रमे
षुच॥ नंदासुचनवम्यांचनकुर्याद्दंतधावनं॥ वृद्धमनुः॥ शनिरंगारक
श्चैवरविःशुक्रस्तथैवच॥ दंतानांकाष्ठसंयोगाद्दहत्यासप्तमंकुलं॥१६॥

Indira Gandhi National
Centre for the Arts

कारिका यमः॥श्राद्धजन्मदिनेचैवविवाहेजीर्णदूषिते॥व्रतेचैवोपवासेचन
॥१४॥ कुर्याद्दंतधावनं॥श्राद्धेयज्ञेचनियमान्नाद्यात्प्रोषितभर्तृका॥१७॥
अद्यान्नजीवकामस्तकासम्भासक्षयादिभिः॥तन्नास्यापाकह
न्नेत्रशिरःकर्णमयाचतत्॥१८॥याज्ञवल्क्यः॥इष्टकालोष्टपाषा
णैर्नखैरंगुलिभिस्तथा॥भुक्त्वाचानामिकांगुष्ठेन्नेकुर्याद्दंतधाव
नं॥१९॥पैठीनसिः॥तृणपर्णोदकेनांगुल्यादंतधावयेत्प्रदेश
नीवर्जं॥वराहः॥अलाभेतिपूर्वाणिनदंतकाष्ठान्यद्यान्नपत्रैश्चसमा ॥१५॥
चरेत्तानि॥नयुग्मपात्राणिनपाटितानिनचार्द्धंमुष्कानिविनात्वचाच॥२०॥

यमः॥मध्याह्नस्नानवेलायांयोभक्षेद्दंतधावनं॥निराशास्तस्यगच्छं
तिदेवताःपितृःसहेति॥२१॥ ॥इतिधावनविधिः॥ ॥यज्ञोपवीतवि
धिः॥कार्पासंचसमादायशुचिक्षेत्रेविशोधयेत्॥जीवद्भर्तृकयाता
र्थ्याब्राह्मण्यासूत्रकारितं॥१॥शुचौदेशेशुचिःसूत्रंसंहतांगुलि
मूलके॥आवर्त्तयेत्षण्णवत्यात्रिगुणीकृत्ययत्नतः॥२॥कार्पा
समुपवीतंस्यात्तस्यैकोग्रंथिरिष्यते॥सावित्र्यातत्त्रिवृत्कुर्यान्नवतं
तुंतुकारयेत्॥३॥ब्रह्माविष्णुश्चरुद्रश्चवासुकिःपवनोनलः॥सो
मःसूर्य्यःसुराचार्यस्तंतूनांनवदेवताः॥४॥त्रिषुष्ठिन्नमधोयामन

Indira Gandhi National
Centre for the Arts

घ्यायकृतं चयत्॥कृतं वा सुचिनायत्तु सुत्रानिर्मितमुत्सृजेत्॥५॥
उँ३म्॥यज्ञोपवीतमंत्रस्य ब्रह्मा ऋषिः परमात्मा देवता अनुष्टुप्
छंदः श्रौतस्मार्त्तकर्मानुष्ठानसिद्ध्यर्थे यज्ञोपवीतधारणे विनियोगः
॥ ॥उँ३म्॥यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्॥
आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥यज्ञोप
वीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि॥६॥ ॥इति यज्ञो
पवीतमंत्रः॥स्नानादूर्ध्वे मनायुष्यमघोनाभेस्तपक्षयः॥तस्यान्न
मिप्रमाणं तु ब्रह्मसूत्रस्य लक्षणं॥७॥ब्रह्मचारिण एकं तु स्नाना ॥१५॥

त्प्रभृति तद्द्वयं॥तृतीयमुत्तरीयं च वस्त्राभावे तदिष्यते॥८॥यज्ञोपवी
ते द्वे धार्ये॥श्रौतस्मार्त्ते च कर्मणि॥वस्त्राभावे तृतीयं तु एकं च प्रथमा
श्रमी॥९॥धारयेन्नित्यमेवाथ आयुःकामो बहून्यपि॥ब्रह्मचारिण
एव स्यात्सकृत्तन्न द्वितीयकं॥१०॥उपवीतमलंकारं स्रजं करकमेव च
॥उपानहौ च वासश्च धृतमन्यैर्न धारयेत्॥११॥मेखलामजिनं दं
प्रक्षिपेत् डमुपवीतं कमंडलुं॥अप्सु प्राप्य द्विनस्तानि धृत्वा चान्यानि मंत्रि
३ तः॥१२॥ब्रह्मणोत्पादितं सूत्रं विष्णुना त्रिगुणीकृतं॥रुद्रेण दीयते
ग्रंथिं सावित्र्या चाभिमंत्रितं॥१३॥प्रणवमुच्चार्य सप्तव्याहृतयस्त

Indira Gandhi National Centre for the Arts

कारिका
॥१६॥ था॥ चतुर्विंशत्यक्षराश्च त्रिरावृत्योपवीतका॥१४॥ षएनवंतंतुविज्ञेय
मृषिभिस्तत्ववेदिभिः॥ दशाष्टौवग्रहस्थस्य चत्वारोवनवासिनः॥ ए
केकमुपवीतंच यतिनो ब्रह्मचारिणः॥१५॥ ॥इतियज्ञोपवीतविधिः
॥ ॥अथविभूतिविश्वामित्रकल्पे॥ ॥सद्योजातमितिपंचब्रह्ममंत्रे
ण विभूतिमभिमंत्रयेत्॥ शन्नोदेवीतिजलंनिक्षिपेत्॥ त्र्यंम्बकमि
तिमंत्रेण विभूतिमङ्गुष्ठेनमर्द्दयेत्॥ मानस्तोकेतिमंत्रेण हृच्चक्षुषो
भ्रूमध्ये ब्रह्मरंध्रे ललाटेच त्रिरेखा सर्वांगेषु आपादं विभूतिलेपनं
॥ ॥इतिविभूतिविधिधारणं॥ ॥अथदर्भविधिः॥ ॥विरंचिनास ॥१६॥

होत्पन्नः परमेष्ठीनिसर्गजः॥ नुदसर्वाणिपापानिदर्भःस्वस्तिकरो
मम॥१॥ ॐकारेणैवमंत्रेण सकलदेवकुशान्स्पृशेत्॥ हुंफट्कारेणमं
त्रेण संद्यायात्प्राङ्मुखः शुचिः॥२॥ शुचौदेशे शुचिर्भूत्वा विप्रः पू
र्वोत्तरामुखः॥ सप्तपत्रनिभादर्भास्तिलक्षेत्रसमुद्भवाः॥३॥ अ
३५ छिन्नाग्राश्चपुष्पाग्राः प्रादेशाश्चप्रमाणतः॥ कुतपाइतिविज्ञेया
स्तैस्तुश्राद्धंसमाचरेत्॥४॥ त्रिशाखस्तुभवेद्दर्भश्चतुःशाखः कु
शः स्मृतः॥ पंचशाखस्तुकल्माषः षट्शाखः प्रवरस्तथा॥५॥
सप्तशाखस्तुकुतपः ऊर्द्ध्वंबार्हिःप्रकीर्तितः॥ एकशाखो द्विशा

कारिका २७

खोवातरणमित्युच्यतेबुधैः॥६॥सुमंतुः॥कुशाःकाशाःशयौदूर्वायवगो
धूमबिल्वजैः॥गो॥केशमुंजःकुंदस्थपूर्वाभावेपरःपरः॥७॥सम्य
ग्लाग्रोविवज्रौतुकुशौद्वौदक्षिणेकरे॥सव्येचैवतथात्रीस्तुबिभृया
त्सर्वकर्मसु॥८॥हारीतः॥स्नानेदानेजपेहोमेस्वाध्यायेपितृतर्प
णे॥पवित्रंतुकरेकृत्वासौवर्णंराजतंचवा॥९॥चतुर्भिर्दर्भैर्विदलैः
पवित्रंब्राह्मणस्यतु॥एकैकंह्रासयेत्तत्तुवर्णेवर्णेयथाक्रमं॥१०॥
द्विराचमेद्द्विजोधौतंवासोपिपरिधायच॥तत्रपूर्वंग्रहणेमंत्रः॥त्रां
त्वः॥ब्रह्मयज्ञेजपेचैवब्रह्मग्रंथिर्विधीयते॥भोजनेवर्तुलःप्रो ॥२७॥
लः
क्तः॥इतिधर्मोनहीयते॥१॥त्रिगुणीकृत्यरज्जुंतुत्रिवृत्यासन्नियोज
त्॥ब्रह्मग्रंथिःसविज्ञेयासदाभोज्यादिकर्मसु॥२॥मूलपर्वणिकु
र्वाणोमहत्याहीयतेश्रिया॥मध्यपर्वणिकुर्वाणोपुत्रदारैर्वियुज्य
ते॥३॥अनामिकाग्रपर्वण्यंपवित्रंबिभृयात्सदा॥अग्रपर्वग्रहणं
काम्यजपविषयं॥१४॥सपवित्रेणहस्तेनकुर्यादाचमनक्रियां
॥नोच्छिष्टंतत्पवित्रंस्यात्भुक्तोच्छिष्टंतुवर्जयेत्॥१५॥कुशयुक्तं
पिबेत्तोयंकुशाप्तमुपस्पृशेत्॥कुशाग्रनिःसृतंतोयंसोमपा
नंदिनेदिने॥१६॥कुशमूलेस्थितोब्रह्माकुशमध्येजनार्दनः॥कु

Indira Gandhi National
Centre for the Arts

शाग्रेशाङ्कुरश्चैवकुशांस्तस्मात्प्रधारयेत्॥१७॥नीवीमध्येस्थितादर्भा
ब्रह्मसूत्रेचयेधृताः॥पवित्रांस्तान्विजानीयाद्यथाकायस्तथाकुशाः
॥१८॥अपूतान्गर्भितान्दर्भान्येचान्येछेदितान्नखैः॥मार्गेजा
नग्निदग्धांश्चकुशान्यत्नेनवर्ज्जयेत्॥१९॥हारीतः॥समित्पुष्प
कुशादीनिब्राह्मणःस्वयमाहरेत्॥शूद्राहृतैःक्रयक्रीतैःकर्म
कुर्वन्व्रजत्यधः॥२०॥मासेनभस्यमावास्यातस्यांदर्भोच्चयःस्मृतः
॥अयातयामास्तेदर्भानियोक्तव्याःपुनःपुनः॥२१॥ ॥इतिदर्भ
विधिः॥ ॥अथप्रणवविधिः॥ ॥तत्रकात्यायनः॥ ॥ॐकारस्य



Indira Gandhi National
Centre for the Arts